आगमनं, क्ली, आङ्पूर्ब्बगमधातोरनट्प्रत्ययान्तस्य रूपमिदं। आसा इति भाषा॥ (यथा रघुवंशे। "रामस्यासन्नदेशत्वात् भरतागमनं पुनः"। स्त्रीसङ्गमः। यथा,—
"अन्यागमनपापस्य पापः पृच्छन् स निष्कृतिं"।
इति राजतरङ्गिण्यां।)

आगमावर्त्ता, स्त्री, वृश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

आगमितं, त्रि, (आ + गम + णिच् + क्त) अधीतं। पठितं। इति जटाधरः॥ (ज्ञापितं प्रापितं।)

आगाधं, क्ली, (अगाध एव। स्वार्थे अण्।) अगाधं। अतिगभीरं इत्यमरटीकायां मथुरानाथः॥

आगान्तुः, त्रि, आगन्तुकः। अतिथिः। इत्यमरटीकायां नीलकण्ठः॥ (अभ्यागतः। आगन्तुः।)

आगामी, [न्] त्रि, (आङ् + गम् + णिन्। भविष्यत्कालः। इति राजनिर्घण्टः। (यथा, हितोपदेशे। "भो यजमान! आगामिन्याममावास्यायां यक्ष्यामि यज्ञम्"।)

आगारं, क्ली, (आग + ऋ + अण्) गृहं। इत्यमरटीका। (यथा मनुः।
"आसीनं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत्।)

आगुः, [र्] स्त्री, आगूः। प्रतिज्ञा। इत्यमरटीकायां रमानाथः॥

आगूः, स्त्री, (आ-गमेः क्विपि गमः क्वावित्यन्तलोपे ऊङ्गमादीनामित्यूकारादेशः।) प्रतिज्ञा। इत्यमरः॥

आग्नीध्रं, क्ली, (अग्निमिन्धे, इन्धीदीप्तौ, क्विप्, नलोपः। अग्नीधः स्थानं; अग्नीधः शरणे रन्। तत्रस्थितत्वात् ऋत्विग्प्याग्नीध्र उच्यते) अग्नीध्रं। होत्रगृहं। इत्यमरटीकायां रमानाथः॥ आग्नेय्या अग्नीध्रमुपतिष्ठते इत्यत्र आग्नीध्रं मण्डपमित्याख्यानदर्शनात्। धनदाता वरणीयऋत्विजि पुं॥ (स्वायम्भुवस्य प्रथमस्य मनोर्द्दशपुत्रमध्ये परिगणितः स्वनामख्यातः पुत्रः। यथा हरिवंशे।
"आग्निध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः।
ज्योतिष्मान् द्युतिमान् हव्यसवलः पुत्र एव च॥
मनोः स्वायम्भुवस्यैते दश पुत्राः महौजसः"।
प्रियव्रतनृपपुत्रः स्वनामख्यातो मनुवंशीयो नृपतिः। यदुक्तं,—
"अग्नीध्रो नाम नृपतिर्जम्बुनाथो मनोः कुले।
तज्जातो नृपसंज्ञाभिः कथ्यन्ते भरतादयः"॥
प्रियव्रतस्य राज्ञः दशपुत्रमध्येपरिगणितः स्वनामख्यातः पुत्रः। यदुक्तम् विष्णुपुराणे २। १॥
"प्रियव्रतसुताः ख्यातास्तेषां नामानि मे शृणु॥
अग्नीध्रश्चाग्निबाहुश्च वपुष्मान् द्युतिमांस्तथा।
मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च॥
ज्योतिष्मान् दशमस्तेषां सत्यनामा सुतोऽभवत्"॥८

आग्नेयं, क्ली, (अग्निर्द्देवता यस्य।) स्वर्णं। इति राजनिर्घण्टः। देशविशेषः। इति शब्दरत्नावली॥ रक्तं। इति हेमचन्द्रः॥ घृतं। इति पाणिनिः॥

आग्नेयः, पुं, (अग्निर्द्देवतास्य अण्। अग्निनोक्तं पुराणं यदाग्नेयं वेदसम्मितमित्युक्तलक्षणे महापुराणभेदे वह्निपुराणे च। अग्निदेवताके द्रव्यमात्रे च त्रिं। अग्नियोषिति स्वाहायाम् अग्निदेवताकायामृचि च। आग्नेयव्रतं। यथा मनौ ९।३१०।
"दुष्टसामन्तहिंस्रस्य तदाग्नेयव्रतं स्मृतम्"।)
अगस्त्यमुनिः। इति पाणिनिः॥ अग्निसम्बन्धीये त्रि

आग्नेयी, स्त्री, (आग्नेय + ङीप्।) अग्निकोणं॥ स्वाहा। इति जटाधरः॥

आग्रयणं, क्ली, नवशस्येष्टिः। यथा,—
"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः"॥
इत्यनेन शरद्वसन्तविहितनवशस्येष्टेः।
"श्यामाकैर्व्रीहिभिश्चैव यवैरन्योन्यकालतः।
प्रग्यष्टुं युज्यतेऽवश्यं न त्वत्राग्रयणात्ययः"॥
इति कालान्तरदर्शनात् श्राद्धेऽपि तथा इति। आग्रयणं नवशस्येष्टिः। इति मलमासतत्त्वं॥

आग्रहः, पुं, (आङ् + ग्रह + अप्) अनुग्रहः। आसक्तिः। आक्रमः। ग्रहणं। इति मेदिनी॥ (प्रसादः, अभिनिवेशः, आसङ्गः, यथा,
"इत्याग्रहात् वदन्तं तं स पिता तत्र नीतवान्"॥
इति कथासरित्सागरे २५। ९९।)

आग्रहायणः, पुं, मार्गशीर्षमासः। इति रायमुकुटः॥

आग्रहायणिकः, पुं, (आग्रहायण्या मृगशिरसा युक्ता पौर्णमासी अस्मिन्। आग्रहायण + ठक्) अग्रहायणमासः। मतभेदे वत्सराद्यमासोऽयं। अस्मिन् मासे वृश्चिकराशिस्थो रविः। तत्पर्य्यायः। मार्गशीर्षः २ सहाः ३ मार्गः ४। इत्यमरः॥ आग्रहायी ५ अलकः ६ सहः ७ मार्गशिरः ८। इति शब्दरत्नावली॥ अग्रहायणसम्बन्धिनि त्रि।

आग्रहायणी, स्त्री, (अग्रे हायनमस्याः। मतभेदे मार्गशीर्षमारभ्य वर्षप्रवृत्तेः। प्रज्ञाद्यण्। पूर्ब्बपदादिति णत्वं। गौरादित्वात् ङीष्) मृगशिरोनक्षत्रं। इत्यमरः॥ अग्रहायणमासस्य पौर्णमासी॥

आघट्टकः, पुं, (आङ् + घट्ट + वुन्। ततः स्वार्थे कः) रक्तापामार्गः। इति राजनिर्घण्टः॥

आघाटः, पुं, (आङ् + घट् + घञ्) सीमा। इति हेमचन्द्रः॥ अपामार्गः। इति राजनिर्घण्टः॥

आघातः, पुं, (आङ् + हन् + घञ्) वधस्थानं। इति त्रिकाण्डशेषः॥ हननं। छेदनं। चोट कोप इत्यादि भाषा॥ (यथा साहित्यदर्पणे। "पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यैः"॥)

आघातनं, क्ली, (आङ् + हन् + स्वार्थे णिच् + ल्युट्) वधस्थानं। इति हारावली॥ हननं॥

आघारः, पुं, (आङ् + घृ + घञ्) घृतं। इति हेमचन्द्रः। ऋग्वेदिनां स्रुवेण चतुराज्यं स्रुचि दत्त्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नेर्वायव्यकोणादारभ्याग्नेयीं यावदविच्छिन्नघृतधारादानं। पुनः स्रुवेण चतुराज्यं स्रुचि दत्त्वा इन्द्रं ध्यात्वाग्नेर्नैरृतकोणादारभ्य ऐशानीं यावदविच्छिन्नघृतधारादानं। इति कालेसिः॥ यजुर्वेदिनान्तु स्रुवेण मन्त्रोच्चारणपूर्ब्बकपूर्ब्बोक्तक्रमेण घृतधारादानं। इति पशुपतिः॥

आघूर्णितं, त्रि, (आङ् + घूर्ण + क्त) घूर्णितनेत्रादिः। घूराण इति भाषा। यथा, देवीमाहात्म्ये॥
"आघूर्णितो वा वातेन स्थितः पोते महार्णवे"॥

आघ्राणं, क्ली, (आङ् + घ्रा + ल्युट्) तृप्तिः। इति हेमचन्द्रः॥ गन्धग्रहणं। सोँका इति भाषा॥ "भेदघ्नां गन्धाघ्राणतः।" इति कथासरित्सागरे १३। १६।)

आघ्रातः, त्रि, (आङ् + घ्रा + क्त) शिङ्घितः। आक्रान्तः। इति मेदिनी॥ तृप्तः। इति हेमचन्द्रः॥ (घ्राणविषयीकृतः। यथा, नागानन्दे। "नीताः किं न निशा शशाङ्कधवला नाघ्रातमिन्दीवरं॥)

आर्घ्यं, क्ली, पीतवर्णदीर्घतुण्डषट्पदसन्निभमाक्षिकोत्पन्नमधु। अस्य गुणाः। अतिशयचक्षुर्हितकारित्वं। कफपित्तरक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ यथा, भावप्रकाशः॥
"मधूकवृक्षा निर्यासं जरत्कार्य्यांश्रमोद्भवाः।
स्रवन्त्यार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः।
आर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः"॥
("आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परं।
कषायं कटुपाके च बल्यं तिक्तमवातकृत्"॥
इति सुश्रुतः॥)

आङ्, अ, उपसर्गविशेषः। अस्यार्थः। ईषत्। यथा आपिङ्गलः। अभिव्याप्तिः। यथा आजन्मब्रह्मचारी। सीमा। यथा आसमुद्रक्षितीशानां। इति रघौ १ म सर्गे। धातुयोगजः। यथा आरोहति। इत्यमरभरतौ॥ समन्तात्। ग्रहणं। प्रत्यावृत्तिः। इति दुर्गादासः॥

आङ्गं, क्ली, (अङ्गस्य इदं। अङ्ग + अण्) कोमलाङ्गं। इति त्रिकाण्डशेषः॥

आङ्गारं, क्ली, (अङ्गार + अण्) अङ्गारसमूहः। इति रायमुकुटः॥

आङ्गिकः, त्रि, (अङ्ग + ठक्) अङ्गनिष्पन्नभावव्यञ्जकभ्रूक्षेपादिः। इत्यमरः॥ माहङ्गिकः। इति शब्दरत्नावली॥ (यथा साहित्यदर्पणे।
"भवेदभिनयोऽवस्थानुकारः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा"।)

आङ्गिरसः, पुं, (अङ्गिरस् + अण्) वृहस्पतिः। इत्यमरः। (यथा मनुः। २। १५१।
"अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान्"॥)

आचमनं, क्ली, (आङ् + चम् + ल्युट्) वैधकर्म्मारम्भात् पूर्ब्बं वारत्रयजलपानानन्तरं यथाक्रमास्याङ्गस्पर्शरूपशुद्धिजनकक्रिया। तत्पर्य्यायः। उपस्पर्शः २। इत्यमरः॥ आचमः ३ शुचिप्रणीः ४। इति शब्दरत्नावली॥ तद्विधानं यथा॥
"त्रिराचामेदपः पूर्ब्बं द्विः प्रमृज्यात्ततो मुखं।
संमृज्याङ्गुष्ठमूलेन त्रिभिरास्यमुपस्पृशेत्॥
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरं।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः॥
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयन्तु तलेन वै।
सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥